# Gangasagarasangama Mahima Varnanam and Sagareshvara Shiva Stuti

# ગઙ્ગાસાગરસઙ્ગમમહિમવર્ણનૈવં સૂતપ્રોક્તં સાગરેશ્વરશિવસ્તુતિઃ

## Document Information

Text title : Gangasagarasangama Mahima Varnanam and Sagareshvara Shiva Stuti by Suta

File name : sAgareshvarashivastutiHgangAsAgarasangamamahimavarNanaivaMsUtaproktam.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 31|| -

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

Gangasagarasangama Mahima Varnanam and Sagareshvara Shiva Stuti

# ગઙ્ગાસાગરસઙ્ગમમહિમવર્ણનૈવં સૂતપ્રોક્તં સાગરેશ્વરશિવસ્તુતિઃ

(શિવગૌરીદસંવાદે)

ઈશ્વરઃ -

શ્રીગઙ્ગાસાગરં ગૌરિ પુણ્યં પાપવિનાશનમ્ ।
ગઙ્ગાસાગરસઙ્ઘટ્ટભિન્નવાર્ધિતરઙ્ગકમ્ ॥ ૧॥

તાં ગઙ્ગાં સાગરો દૃષ્ટ્વા તરઙ્ગાવલિભાસુરઃ ।
હસન્ફેનગણૈર્નૃત્યન્સમાશ્લિષ્યન્નિવ પ્રિયામ્ ॥ ૨॥

તરઙ્ગહસ્તૈર્દેવેશિ ગર્જન્કોલાહલારવૈઃ ।
ગઙ્ગાજલાવિલતનુસ્તદાઽઽસીત્સાગરોમઽમ્બિકે ॥ ૩॥

તત્ર સસ્નુર્દેવગણાસ્તથા મુનિગણાઃ શિવે ।
બ્રહ્મવિષ્ણ્વાદયો દેવાઃ પરં હર્ષમવાપ્નુવન્ ॥ ૪॥

સ્નાત્વા સન્તર્પ્ય ચ પિતૄન્ ભસ્મનોદ્ધૂલ્ય તે તનુમ્ ।
દત્વા દાનાનિ પુણ્યાનિ ગાશ્ચ ભૂમિં તિલં ધનમ્ ॥ ૫॥

મત્પ્રીત્યર્થં મહાદેવિ બ્રાહ્મણેષુ તપસ્વિષુ ।
યત્ર ગઙ્ગાસાગરસ્ય(યોઃ) સઙ્ગનોઽસ્તિ મહેશ્વરિ ॥ ૬॥

તત્ર સ્નાનં કૃતં હ્યેતત્ ફલદં સર્વપાપહૃત્ ।
અન્યત્ર વિંશત્કૃચ્છ્રાણિ પુરભિદ્યઃ પ્રકલ્પયત્ ॥ ૭॥

તત્રાસ્તિ મે બિલ્વવનં નવારુણદલાન્વિતમ્ ।
કદમ્બનિમ્બપ્રસવૈઃ નીપમન્દારસુન્દરમ્ ॥ ૮॥

તમાલતિલકોપેતં બકુલોદ્દાલકેતકમ્ ।
તમાલતાલ હિન્તાલ સાલનીલીવિરાજિતમ્ ॥ ૯॥

ગઙ્ગાતીરે મહાનીરભૂમિતર્પિતભૂરુહમ્ ।

નવોરુબિલ્વશાખાગ્રં ફલભારાવનામિતમ્ ॥ ૧૦॥

પુષ્પસૌરભ્યમધુરં ગન્ધામારુતવીજિતમ્ ।
વસન્તમુકુલોત્ફુલ્લમલ્લીવલ્લી વિરાજિતમ્ ॥ ૧૧॥

કેતકોદ્દામરજસા ગન્ધીકૃતદિગન્તરમ્ ।
વેણુવેત્રગણચ્છન્નં નાનાશકુનિનાદિતમ્ ॥ ૧૨॥

ગઙ્ગાસાગરતીરસ્થં વનમેકમભૂન્મમ ।
તીરસંસ્થમહાલિઙ્ગં મમ સર્વાર્થદાયકમ્ ॥ ૧૩॥

તત્ર શૈવવરાઃ સન્તિ ગઙ્ગાસાગરવાસિનઃ ।
ભસ્મરુદ્રાક્ષસમ્પન્નાઃ પઞ્ચાક્ષરપરાયણાઃ ॥ ૧૪॥

રુદ્રલિઙ્ગાર્ચનપરા રુદ્રાધ્યાયજપાદરાઃ ।
તદ્બિલ્વવનજાપારબિલ્વપત્રૈઃ સદામ્બિકે ॥ ૧૫॥

સાગરેશં મહાલિઙ્ગં દૃષ્ટ્વા નત્વા ચ ભક્તિતઃ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય વસન્તિ નિયતા હિ તે ॥ ૧૬॥

ગઙ્ગાસાગરમાસાદ્ય ક્ષેત્રમત્યન્તપુણ્યદમ્ ।
સાગરે ચાથ ગઙ્ગાયાઃ સ્નાત્વા પુણ્યપ્રદેઽમ્બિકે ॥ ૧૭॥

સોઽશ્વમેધમવાપ્નોતિ દૃષ્ટ્વા માં સાગરેશ્વરમ્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય સ્નાપ્ય સઙ્ગમવારિભિઃ ॥ ૧૮॥

કૃતકૃત્યો નરો ભૂયાન્નરઃ સુગતિભાગ્ભવેત્ ।
યો ગોશતં કુરુક્ષેત્રે દદ્યાદ્વેદવિદિ દ્વિજે ॥ ૧૯॥

તસ્માચ્છતગુણં પુણ્યં ગઙ્ગાસાગરમજ્જને ।
તત્ર સન્તર્પ્ય ચ પિતૄન્ શ્રાદ્ધં દદ્યાચ્ચ યો નરઃ ॥ ૨૦॥

તસ્ય વર્ષશતં તૃપ્તાઃ પિતરઃ સપિતામહાઃ ।
એકં કોટિગુણં ભોજ્યં બ્રાહ્મણેન મહેશ્વરિ ॥ ૨૧॥

દત્વૈકાં ગો દરિદ્રાય શતગોદાનપુણ્યભાક્ ।
યો લિઙ્ગં સ્નાપયેન્નીરૈર્ગઙ્ગાસાગરસમ્ભવૈઃ ॥ ૨૨॥

ક્ષીરકુમ્ભશતૈઃ સ્નાપ્ય યત્ફલં તચ્છતાધિકમ્ ।
તરઙ્ગમાલાકલિતગઙ્ગાસાગરસઙ્ગમે ॥ ૨૩॥

તત્તરઙ્ગોત્થવાતેન પાપભઙ્ગઃ પ્રજાયતે ।
તત્ર સ્નાત્વા તુ મુનયો ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૨૪॥

પાપસઙ્ઘૈર્વિમુચ્યન્તે સત્યમેવ મહેશ્વરિ ।
વ્યતીપાતે વૈધૃતૌ ચ અયને સઙ્ક્રમે તથા ॥ ૨૫॥

પર્વકાલેષુ સર્વેષુ પક્ષે ચૈવાથ પર્વણિ ।
કૃષ્ણાઙ્ગારચતુર્દશ્યાં ગઙ્ગાસાગરસઙ્ગમે ॥ ૨૬॥

મહાદધૌ નરઃ સ્નાત્વા સર્વપાપૈઃ પ્રમુચ્યતે ।
પઞ્ચભિઃ પાતકૈર્ઘોરૈસ્તત્ર સ્નાત્વા મહેશ્વરિ ॥ ૨૭॥

ગ્રહણે ભક્તિમાન્સ્નાત્વા દત્વા ચ તિલપર્વતમ્ ।
મલ્લિઙ્ગં સમ્પ્રપૂજ્યૈવ સાગરેશં વિમુચ્યતે ॥ ૨૮॥

મહાદાનાનિ તત્રૈવ નૃપૈઃ પૂર્વં કૃતાનિ હિ ।
ઇક્ષ્વાકુકુક્ષિનાભાગમાન્ધાતૃસાગરાદિભિઃ ॥ ૨૯॥

યયાતિનહુષાદ્યૈશ્ચ દેવિ શ્રદ્ધાપુરઃસરમ્ ।
સાગરેશસ્ય દેવસ્ય બદ્ધસ્તૈઃ સ શિવાલયઃ ॥ ૩૦॥

પૂજિતઃ સાગરેશોઽપિ નાનાવિભવતઃ સુરૈઃ ॥

તત્ર સ્નાત્વા સાગરેશં પ્રણમ્ય નિયતો નરઃ ।
સ્તોત્રમેતત્પઠન્ભક્ત્યા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૩૧॥

—

સૂતઃ -
ભગઘ્નં પુરઘ્નં મખઘ્નં યમઘ્નં ભજામ્યન્તકઘ્નં ગજઘ્નં સ્મરઘ્નમ્ ।
ઉપેન્દ્રાદિવન્દ્યં મહાશૈવહૃદ્યં મહાગદ્યપદ્યૈઃ સ્તુતં તત્વમાદ્યમ્ ॥ ૩૨॥

સુમૌલૌ પિશઙ્ગં દયાસ્રાવ્યપાઙ્ગં ભજે લિઙ્ગસઙ્ગં પદારક્ષભઙ્ગમ્ ।
ક્ષપદ્વીરમીશં મહાજ્ઞાનકોશં મહેશં પ્રકાશં કરાબ્જે હુતાશમ્ ॥ ૩૩॥

ભજાભ્યેકમીશં ગલે નીલનીલં મહાશૈવશીલં જગત્કૃત્યલીલમ્ ।
ભજે કાલકાલં ભજે લિઙ્ગસઙ્ગં પદારક્ષભઙ્ગં હૃદબ્જાન્તરઙ્ગમ્ ॥ ૩૪॥

—

સ્તોત્રવર્યેણ માં ભક્ત્યા સ્તુવન્સાગરમીશ્વરમ્ ।
સર્વાન્કામાનવાપ્નોતિ પાપેભ્યશ્ચ પ્રમુચ્યતે ॥ ૩૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીદસંવાદે ગઙ્ગાસાગરસઙ્ગમમહિમવર્ણનૈવં સૂતપ્રોક્તં સાગરેશ્વરશિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩૧ ॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 31.. -

Notes:

Shiva delineates to Gauri about how the quality of Ganga's flow changes at Ganga-Sagar-Sangamam - the site where River Ganga meets the sea; and what are the merits of worshipping Sagareshwara Linga situated at this Shiva Kshetra amidst the Bilva forest, with a Stuti that Suta thus narrates. Shiva outlines the special time periods for worshipping at Ganga-Sagar-Sangamam viz., Solar and Lunar Eclipses, Vyatipata and Vaidhriti Yoga-s, Ayana and Sankranti-s, all festivals during both paksha-s, Krishnangara Chaturdashi.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Gangasagarasangama Mahima Varnanam and Sagareshvara Shiva Stuti*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*